## द्वितीयः पाठः

## चित्रपाठः

CQZGKU



अयं कः ?

अयं राष्ट्रपिता मोहनदासकरमचन्द-गान्धी।

कथम् अयं राष्ट्रपिता ?

अयं वर्तमानभारतराष्ट्रस्य जनकः अस्ति।

कथम् अयं प्रसिद्धः ?

अयं सत्याग्रहेण अहिंसान्दोलनेन च परतन्त्रं भारतं स्वतन्त्रम्

अकारयत्।




अयं कः ?

अयं अस्माकं राष्ट्रस्य तृतीयः राष्ट्रपतिः डॉ0 जाकिर हुसेनमहाभागः।

कथम् अयं तृतीयः राष्ट्रपतिः ?

अस्य किं वैशिष्ट्यम् आसीत् ?

अयं नूतनायाः प्राथमिक-शिक्षापद्धतेः विशेषज्ञःआसीत्।



अयं कः ?

अयं भारतस्य एकादशः राष्ट्रपति डॉ0 ए0 पी0 जे0 अब्दुलकलामः।

अस्य जन्म कदा अभवत् ?

अस्य जन्म 1931 तमे वर्षे अक्टूबर मासस्य प □चदशे दिनाङ्के अभवत्।

अस्य जन्म तामिलनाडु प्रान्तस्य रामेश्वर नामके स्थाने अभवत्। कथम् अयं प्रसिद्ध ?

अयं महान् वैज्ञानिकः। ‘‘मिसाइलमैन‘‘ इति नाम्ना प्रसिद्धः अभवत।



अयं कः ?

अयं डॉ0 भीमरावअम्बेडकरमहाभागः।

कथम् अयं प्रसिद्धः ?

स्वतन्त्रभारतस्य संविधाननिर्माणे अस्य अपूर्वं महत्त्वपूर्णंच योगदानम् आसीत्।



इयं महाराज्ञी लक्ष्मीबाई।

किमर्थम् इयं प्रसिद्धा ?

इयं लक्ष्मीबाई 1857 तमे वर्षे प्रथम स्वातंत्र्य

संग्रामस्य वीरांगना आसीत्। त्रयोविंशतिवर्षायु प्राप्ता इयं राजमहिषी आंग्लसाम्राज्यस्य सैन्यबलं प्रतिकर्तुं प्रयत्नवती। रणक्षेत्रे वीरगतिं प्राप्तवती परञ्च यावज्जीवनं आंग्लशासकानां झाँसीनगरातिक्रमणं नाङ्गीकृतवती।



इयं का ?

इयं 'भारतकोकिला' श्रीमतीसरोजिनीनायडूमहाशया।

कथम् इयं 'भारतकोकिला' ?

इयं विदुषी कवयित्री सुमधुरभाषिणी च आसीत्।

इयं स्वतन्त्रभारते उत्तरप्रदेशस्य

प्रथमं राज्यपालपदम् अभूषयत्।



इयं का ?

इयं प्रियदर्शिनी इन्दिरागान्धी।

इयं कथं प्रसिद्धा ?

इयम् अस्माकं देशस्य प्रथम-महिला-प्रधानमन्त्री आसीत्।

सर्वे जनाः इमां कुशलप्रशासिकारूपेण श्रद्धया स्मरन्ति।



इयं का ?

इयं भारतानुरागिणी परमविदुषी डॉ0 एनीबेसेण्ट महोदया।

अस्याः का विशेषता ?

इयं जन्मना आङ्ग्लदेशीया।

इयं हिन्दू-विश्वविद्यालयस्य निर्माणाय प्रभूतं धनं विस्तृतं भूखण्डं

च अददात्। अस्याः भाषणेषु रचनासु च संस्कृतवाङ्मयस्य

संस्कृतभाषायाः च गौरवं प्रकाशितम् अस्ति।

इयं देशस्य स्वतन्त्रतायै महत्त्वपूर्णं योगदानम् अकरोत्।

**लखनऊनगरम्**

लखनऊनगरम् उत्तरप्रदेशस्य राजधानी अस्ति।

इदं प्राचीनं सुरम्यं च नगरम् अस्ति।

अत्र बहूनि दर्शनीयानि स्थलानि सन्ति, यथा-रेजीडेंसीस्थलम्,

इमामबाड़ाभवनम्, सचिवालयश्च।

इदं किम ?



इदं **रेजीडेंसीस्थलम्** अस्ति।

इदम् अस्माकं देशभक्तानाम् आत्मत्यागं स्मारयति।

प्रथमे स्वतन्त्रतासंग्रामे 1857 तमे वर्षे भारतीयाः वीराः

आङ्ग्लशासनस्य यदा विरोधम् अकुर्वन् तदा देश-भक्ताः अत्रापि आङ्ग्लान् आक्रान्तवन्तः। अस्मिन् युद्धे राष्ट्रभक्तैः स्वरक्तं प्रवाहितम्। तेषां त्यागेनैव स्वतन्त्रतायाम् एकं सोपानं निर्मितम्।



इदं **सचिवालयभवनम्** अस्ति।

अस्मिन् भवने विधानसभायाः विधानपरिषदश्च अधिवेशनानि भवन्ति।

अस्मिन् एव भवने स्थित्वा राज्यस्य मन्त्रिणः सचिवाः अन्ये

चाधिकारिणः राजकार्यं स×चालयन्ति। सचिवालये एव

उत्तरप्रदेशशासनस्य मुख्यः कार्यालयः अस्ति।

इदं किम् ?



इदं आंचलिक-विज्ञान-केन्द्रम् अस्ति।

किमर्थम् इदं प्रसिद्धम् ?

इदं हि अनुभवाधारित शिक्षा प्रदानाय विख्यातं वर्तते।

इदं केन्द्रं लखनऊनगरस्य मध्ये स्थितं अस्ति।

अस्मिन् केन्दे्र अन्वेषणकक्षम् इति नाम्नः भवनमस्ति।

अस्य कक्षे भूजलीयान्वेषणं जैव प्रौद्योगिकीक्रान्तिः व्यावहारिक विज्ञानं चेति तिस्त्रः दीर्घिकाः सन्ति।

इदम् **इमामबाड़ा**-भवनम् अतिमनोहरम् अस्ति



इदम् अवधशासकानां स्मारकम् अस्ति।

अस्य भवनस्य छदिः अतिविस्तृता अस्ति। इयं स्तम्भैः विनापि

बहुकौशलेन निर्मिता अस्ति। अस्मिन् एकं विचित्रं सोपानमण्डलम् अस्ति।

तत्र नवागन्तुकाः बहुधा मार्गं विस्मरन्ति।

अत एव जनाः इदं भवनं 'भूलभुलैया' इति वदन्ति।

**शब्दार्थः**

**सत्याग्रहेण** = सत्य के लिए मन, वचन और कर्म से दबाव डालना। **अन्यत्** = और। **अयच्छत्** = दिया। **कवयित्री** = कविता करने वाली। **असहत** = सहा। **अभूषयत्** = शोभित किया। **प्रेषितवान्** = भेजा। **भारतानुरागिणी** = भारतदेश से प्रेम रखने वाली। **प्रभूतम्** = बहुत। **सुरम्यम्** = अतिसुन्दर। **आक्रान्तवन्तः** = सताये, डराये। **स्मारयति** = याद दिलाती है। **विचलन्ति स्म** = विचलित होते थे। **छदिः** = छत। **स्तम्भैः विनापि** = खम्भों के बिना भी। **अधिवेशनानि** = बैठकें।

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

राष्ट्रपिता अहिंसान्दोलनेन त्यागेनैव कवयित्री संस्कृतवाङ्मयस्य

आक्रान्तवन्त अविष्कृताः, ज्योतिर्विद्, समर्थितम्, ़त्रयोविंशतिवर्षायु,

साम्राज्यस्य, भूजलीयान्वेषणम्, अन्वेषणकक्षम्।

**2. एकपदेन उत्तरत-**

(क) 'राष्ट्रपिता' नाम्ना कः प्रसिद्धः ?

(ख) ''मिसाइलमैन'' इति नाम्ना कः प्रसिद्धः ?

(ग) उत्तर-प्रदेशस्य प्रथमं राज्यपालपदं का अभूषयत् ?

(घ) इन्दिरागान्धी कस्य सुपुत्री ?

(ङ) उत्तरप्रदेशस्य राजधानी का ?

(च) 'शून्यम्' इति अंकस्य आविष्कर्ता कः आसीत् ?

**3. पूर्णवाक्येन उत्तरत-**

(क) डॉ0 भीमरावअम्बेडकरस्य संविधाननिर्माणे कीदृशं योगदानमासीत् ?

(ख) श्रीमती सरोजिनीनायडूः किं पदमभूषयत् ?

(ग) जनाः इन्दिरां केन रूपेण स्मरन्ति ?

(घ) डॉ0 एनीबेसेण्टमहोदया हिन्दू-विश्वविद्यालयाय किम् अददात् ?

(ङ) रेजीडेंसीस्थले भारतभक्तैः किं प्रवाहितम् ?

ध्यातव्यम् -

''इदम्'' शब्दस्य पुंल्लिङ्.गे 'अयम्' इति रूपं भवति। स्त्रीलिङ्गे 'इयम्'इति रूपं भवति। नपुंसकलिङ्गे 'इदम्' इति रूपं भवति। पाठे 'राष्ट्रपिता' इति पुंल्लिङ्गविशेष्येण सह 'अयम'् इति रूपं प्रयुक्तम्। एवमेव 'भारतकोकिला' इति स्त्रीलिङ्गविशेष्येण सह 'इयम्' इति प्रयुक्तम्। नगरम् इति नपुंसकलिङ्गेन सह 'इदम्' इति प्रयुक्तम्। अनेन अयं नियमः अभवत् यत् सर्वनामशब्दाः विशेषणरूपे प्रयुक्ताः भवन्ति। विशेष्ये यत् लिङ्गम्, या विभक्तिः, यत् वचनं च भवति, विशेषणे अपि तत् लिङ्गम्, सा विभक्तिः, तत् वचनं च भवति। सर्वनामशब्दाः- इदम्, तत्, किम्, यत्, अदस्, एतत् चेत्यादयः सन्ति, यथा-

(क) अयं राष्ट्रपिता।

(ख) इयं भारतकोकिला।

(ग) इदं प्राचीनं नगरम्।

**4. सन्धि-विच्छेदं कुरुत -**

पदम् सन्धिविच्छेदः

यथा- अहिंसान्दोलनेन अहिंसा$आन्दोलनेन

अत्रापि ......................................


चासहत ......................................


नातिदूरे ......................................

**5. म×जूषातः-सर्वनाम-पदानि चित्वा चित्रानुसारं वाक्यानि रचयत -**

अयम् इयम् इदम् इमाः इमे





**6. (क) म □जूषातः उचितपदानि चित्वा वाक्यानि पूरयत-**

(1857 तमे वर्षे, सत्याग्रहेण, विदुषी कवयित्री, लखनऊनगरे ्)

(क) महात्मागाँधी.........परतन्त्रं भारतं स्वतन्त्रम् अकारयत्।

(ख) लक्ष्मीबाई...................प्रथम स्वातंत्र्य संग्रामस्य वीरांगना आसीत्।

(ग) श्रीमतीसरोजिनीनायडूमहाशया..................................आसीत्।

(घ) विज्ञान-आंचलिक-केन्द्रम्....................स्थितमस्ति।

**(ख) उचितं संयोजनं कुरूत-**

(क) रेजीडंेसीस्थलम् अनुभवाधारित शिक्षणप्रदानाय।

(ख) इमामबाड़ा प्रदेशस्य मुख्यकार्यालयः।

(ग) सचिवालयः देशभक्तानाम् आत्मत्यागम्।

(घ) विज्ञान-आंचलिक-केन्द्रम् अवधशासकानां स्मारकम्।

**7- संस्कृतभाषायाम् अनुवादं कुरुत –**

(क) महात्मा गान्धी ने देश के लिए कार्य किया।

ख) यहाँ बहुत दर्शनीय स्थल हैं।

(ग) इस स्मारक को देखने लोग आते हैं।

(घ) रेजीडेंसी-स्थल पर देशभक्तों को याद करते हैं।

(ङ) राजभवन में राज्यपाल रहते हैं।

शिक्षण-सङ्केतः

क) कक्षायां छात्रैः अनुच्छेदवाचनं कारयत।

(ख) तत्-किम्-एतत्-शब्दरूपाणां लेखनं वाचनं च कारयत।

**अपन्थानं तु गच्छन्तं सोदरोऽपि विमु×चति।**